# श्री भक्तवरेन्य गणेश स्तोत्रं

विष्णौ च शक्तौ च सूर्ये मयि नराधिप | याभेदबुद्धिर्योग: स सम्यग्योगो मतो मम || १ ||
अहमेव जगद्यस्मात् सृजामि पालयामि च | कृत्वा नानाविधं वेषं संहरामि स्वलीलया || २ ||

अहमेव महाविष्णुरहमेव सदाशिव: | अहमेव महाशक्तिरहमेवार्यमा प्रिय || ३ ||
अहमेको नृणां नाथो जात: पञ्चविध: पुरा | अज्ञानान्मां न जानन्ति जगत्कारण कारणम् || ४ ||

मत्तोगिन्नापो धरणी मत्त आकाश मारुतौ | ब्रह्मा विष्णुश्च रुद्रश्च लोकपाला दिशो दश || ५ ||
वसवो मनवो गावो मनव: पशवोपि च | सरित: सागरा यक्षा वृक्षा: पक्षिगणा अपि || ६ ||

तथैकविंशति: स्वर्गा नागा: सप्त वनानि च | मनुष्या: पर्वता: साध्या: सिद्धा रक्षोगणास्तथा || ७ ||
अहं साक्षी जगच्चक्षुरलिप्त: सर्वकर्मभि: | अविकारोप्रमेयोहमव्यक्तो विश्वगोव्यय: || ८ ||

अहमेव परं ब्रह्माव्ययानन्दात्मकं नृप | मोहयत्यखिलान् माया श्रेष्ठान् मम नरानमून् || ९ ||
अजोव्ययोहं भूतात्मानादिरीश्वर एव च | आस्थाय त्रिगुणां मायां भवामि बहुयोनिषु || १० ||

अधर्मोपचयो धर्मापचयो हि यदा भवेत् | साधून् संरक्षितुं दुष्टांस्ताडितुं सम्भवा म्यहम् || ११ ||
उच्छिद्या धर्म निचयं धर्म संस्थापयामि च | हन्मि दुष्टांश्च दैत्यांश्च नाना लीलाकरो मुदा || १२ ||

|| इति श्री भक्तवरेन्य गणेश स्तोत्रं सम्पूर्णं ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133